# Kashyam Vishnuvarapraptivarnanam

# કાશ્યાં વિષ્ણુવરપ્રાપ્તિવર્ણનમ્

## Document Information

Text title : Kashyam Vishnuvarapraptivarnanam

File name : kAshyAMviShNuvaraprAptivarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 585-602||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# કાશ્યાં વિષ્ણુવરપ્રાપ્તિવર્ણનમ્

- શિવપાર્વતીસંવાદે -

વૈકુણ્ઠાખ્યં મહાસ્થાનં સૃષ્ટં પૂર્વં મયા શિવે ।
તદાધિપત્યં સુખદં તદા દત્તં મયા શુભે ॥ ૫૮૫॥

લોકાન્ધર્મેણ સતતં પાલયેતિ પરોઽપરઃ ।
દત્તસ્તદૈવ સન્તોષાદદેયો દુર્લભો મયા ॥ ૫૮૬॥

તદાનીં પૂજયામાસ કમલૈરમલૈઃ સ મામ્ ।
સહસ્રનામમન્ત્રૈસ્તુ શ્રદ્ધાભક્તિપુરઃ સરમ્ ॥ ૫૮૭॥

તદ્ભક્તિદર્શના(શોધના)ર્થાય તદૈકં કમલં મયા ।
દૂરીકૃતં તદેકોનં નામ સાહસ્રકસ્ય ચ ॥ ૫૮૮॥

તદા વિચાર્ય કમલમદૃષ્ટ્વાસૌ જનાર્દનઃ ।
સ્વનેત્રકમલેનૈવ નામસઙ્ખ્યામપૂરયત્ ॥ ૫૮૯॥

તદાત્યન્તમભૂત્પ્રીતિર્મમ તસ્મિન્વરાનને ।
તતો નેત્રં મયા દત્તં પુણ્ડરીકનિભં શુભમ્ ॥ ૫૯૦॥

પુણ્ડરીકાક્ષમિત્યેવ નામ લબ્ધં ચ વિષ્ણુના ।
તેન ઘોરતરં તપ્તં તપસ્તત્ફલમીદૃશમ્ ॥ ૫૯૧॥

તેનૈવ વિષ્ણુના તત્ર ચક્રં લબ્ધં વરાનને ।
સુદર્શનાખ્યમમલં કોટિસૂર્યસમપ્રભમ્ ॥ ૫૯૨॥

તેનૈવ સર્વશત્રૂણાં વિનાશં સ કરિષ્યતિ ।
પુરા મદઙ્ઘ્રિલેખાભિઃ સૃષ્ટં તચ્ચક્રમુત્તમમ્ ॥ ૫૯૩॥

વરોઽન્યો યાચિતસ્તેન સર્વલોકહિતાવહઃ ।
ઇદં પાપહરં ભૂયઃ કુણ્ડમસ્તીતિ સાદરમ્ ॥ ૫૯૪॥

ઇદં મણિગણાકીર્ણં મણિકર્ણિસમન્વિતમ્ ।

મણિકર્ણીતિ વિખ્યાતિ કુણ્ડં યાતુ જગત્પ્રભો ॥ ૫૯૫॥

અત્રૈકમજ્જનાદેવ મુક્તા યાન્તુ જનાઃ સદા ।
સ્મરણેનાપિ પાપાનાં વિનાશો ભવતુ પ્રભો ॥ ૫૯૬॥

યઃ કરોતિ પિતૃશ્રાદ્ધમેતત્તીરે મનોહરે ।
યાન્તુ તત્પિતરઃ સર્વે બ્રહ્મલોકં મહેશ્વર ॥ ૫૯૭॥

અત્ર યઃ શૈવપુણ્યાત્મા તનુત્યાગં કરિષ્યતિ ।
શૈવં પઞ્ચાક્ષરં તત્ર સ સમાપ્નોતુ શઙ્કરમ ॥ ૫૯૮॥

તતશ્ચ ત્વત્પ્રસાદેન સ મોક્ષમધિગચ્છતુ ।
અક્લેશેનૈવ દેવેશ પુનરાવૃત્તિદુર્લભમ્ ॥ ૫૯૯॥

ઇતિ પૃષ્ટા વરાસ્તેન સર્વે દત્તા મયા શિવે ।
તદા મન્દારકુસુમૈરભૂદ્વૃષ્ટિર્મનોહરા ॥ ૬૦૦॥

વૈકુણ્ઠલોકં સમ્પ્રાપ્ય તદનુ પ્રીતમાનસઃ ।
પૂજયત્યેવ માં નિત્યમભિવાદ્ય પુનઃ પુનઃ ॥ ૬૦૧॥

અન્તર્ગૃહે વાસમનન્યલભ્યં લબ્ધ્વા તપસ્યાં યદિ સાવધાનમ્ ।
કરોતિ યઃ કશ્ચન શૈવવર્યસ્તસ્મૈ મયા દીયતે એવમિષ્ટઃ ॥ ૬૦૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કાશ્યાં વિષ્ણુવરપ્રાપ્તિવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૧ । ૫૮૫-૬૦૨॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 585-602..

Notes:
Śiva શિવ narrates to Pārvatī પાર્વતી, about the boons that were granted to Viṣṇu વિષ્ણુ when He had so ardently worshiped Śiva શિવ that He even offered one of His eyes to compensate for a missing lotus from the thousand of them that He was offering while reciting Śiva Sahasranāma શિવ સહસ્રનામ. Pleased with such intense devotion, Śiva શિવ granted the Sudarśana cakra સુદર્શન ચક્ર to Viṣṇu વિષ્ણુ.
Upon being beseeched further, Śiva શિવ instructed Him about merits of performing worship and rites at the Maṇikarṇikā ŚivaTīrthaKṣetra મણિકર્ણિકા શિવતીર્થક્ષેત્ર; and, mentions that anyone who breathes his/her last at while reciting the Śiva Pañcākṣara Mantra શિવ પઞ્ચાક્ષર

મન્ત્ર at Maṇikarṇikā ŚivaTīrthaKṣetra મણિકર્ણિકા શિવતીર્થક્ષેત્ર in Kaśī કાશી, would be eligible for liberation.
Kaśī કાશી harbors several ŚivaTīrthaKṣetra શિવતીર્થક્ષેત્ર that are outlined in ŚivaRahasyam saptāṃśaḥ શિવરહસ્યં સપ્તાંશઃ.

Proofread by Ruma Dewan

---

*Kashyam Vishnuvarapraptivarnanam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*